मार्च, अप्रैल २०१७ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

'भारते भातु भारती'

# वन्दे कृष्णं जगद्गुरुम्

-डा. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)
देवकीनन्दनं पुत्रं श्रीवासुदेवस्याऽत्मजम् ।
राधाप्रियं वासुदेव वन्दे कृष्णं जगद्गुरुम् ॥

(२)
नारायणस्याऽवतारं कंसादिदुष्टमारकम् ।
रुक्मिणीवल्लभं देवं वन्दे कृष्णं जगद्गुरुम् ॥

(३)
उपदेशकं गीताया भगवन्तं योगेश्वरम् ।
पार्थस्य सारथिं देवं वन्दे कृष्णं जगद्गुरुम् ॥

(४)
गोपनन्दकुमारं गोकुले यशोदापालितम् ।
गोपिकावल्लभं देवं वन्दे कृष्णं जगद्गुरुम् ॥

(५)
चौरकं नवनीतस्य सुदाममित्रं मोहनम् ।
प्रियं सत्यभामाकान्तं वन्दे कृष्णं जगद्गुरुम् ॥

(६)
मातुलवधकर्तारं मातामहराज्याऽर्पकम् ।
द्वारकायाः पतिं देवं वन्दे कृष्णं जगद्गुरुम् ॥

(७)
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
जाम्बवत्याः पतिं देवं वन्दे कृष्णं जगद्गुरुम् ॥

(८)
भारतवर्षे सर्वत्र यः स्वभक्तैराराध्यते ।
तं गवां पालकं देवं वन्दे कृष्णं जगद्गुरुम् ॥

दूरभाष ९२१९४०६०७८, ९२१९४०६७४ (ज्वालापुरम्)  तारगृहम्- महाविद्यालयः ज्वालापुरम्

# भारतोदयः

संस्कृत-मासिकपत्रम्

| वर्षम् | अङ्कौ |
|---|---|
| १०७ | ९, १० |

सम्पादकः
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पी-एच. डी.
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डॉ. केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रबन्ध-सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्-२०९४०४
(उत्तराखण्ड-प्रदेशः)

शुल्क-विवरणम्

| | |
|---|---|
| प्रत्यङ्कम्- | ५/- |
| वार्षिकम्- | ५०/- |
| आजीवनम्- | ५००/- |


## विषयानुक्रमणिका


| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ३ |
| २. वैदिकवाङ्मये भूगर्भ-विज्ञानम् | -डॉ. हरिगोपालशास्त्री | ४ |
| ३. प्रियायाः सान्निध्यम्(२) | -डॉ. प्रशस्यमित्र शास्त्री | ७ |
| ४. कुलभूमि-गौरवम्(३) | -प्रो. सत्यदेवनिगमालंकारः चतुर्वेदी | ११ |
| ५. त्रिपथगा | -डॉ. प्रकाशचन्द्रपन्तः 'दीपः' | १३ |
| ६. तैर्विदेशे धनं सञ्चितम् | -प्रो. अभिराज-राजेन्द्रमिश्रः | १४ |
| ७. चिरकारी | -प्रो. रामदत्तशर्मा | १५ |
| ८. संस्कृतेन विश्वशान्तिः | -कु.पूजारानीशास्त्री | १६ |
| ९. भारतोदय-प्रकाशन-विवरणम् | -डॉ. हरिगोपालशास्त्री | १९ |
| १०.मधुमासः | -डॉ. रणजीतकुमारो झा | २० |



## राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्

### भारतोदयः(संस्कृत-मासिकम्)

(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः पत्रालयः - | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डॉ. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

x x x

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

वर्षम्- १०७ | चैत्रः, वैसाखः २०७४ विक्रमाब्दः ❋ मार्च-अप्रैल २०१७ ईसवीयाब्दः | अङ्कौ- ९, १०

## ❋ श्रुति-सुधा ❋

**ओ३म् जघन्वाँ उ हरिभिः संभृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः।**
**अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे॥**

ऋग्वेदः १.१०.५२.७

पदार्थः-

**(जघन्वान्)** हननं कुर्वन् **(उ)** वितर्के **(हरिभिः)** हरणशीलैरश्वैः किरणैर्वा **(सम्भृतक्रतो)** संभृता धारिताः क्रतवः क्रिया प्रज्ञा वा येन, तत्सम्बुद्धौ **(इन्द्र)** मेघावयवानां छेदकवच्छत्रुच्छेदक **(वृत्रम्)** मेघम् **(मनुषे)** मानवाय **(गातुयन्)** यो गातुं पृथिवीमेति, सः **(अपः)** जलानि **(अयच्छथाः)(बाह्वोः)** बलाकर्षणयोरिव भुजयोः **(वज्रम्)** किरणसमूहवच्छस्त्रसमूहम् **(आयसम्)** अयोनिर्मितम् **(अधारयः)** धारय **(दिवि)** द्योतनात्मके व्यवहारे **(आ)** समन्तात् **(सूर्यम्)** सवितृमण्डलमिव न्यायविद्याप्रकाशम् **(दृशे)** दर्शयितुम्॥८॥

भावार्थः-

**यथा सूर्यलोको बलाकर्षणाभ्यां सर्वान् लोकान् धृत्वा जलमाकृष्य वर्षित्वा दिव्यं सुखं जनयति, तथैव सभा(पतिः) सर्वान् शुभगुणान् धृत्वा (प्रजाभ्यः) श्रियमाकृष्य सुपात्रेभ्यो दत्वा प्रजाभ्य आनन्दं प्रकटयेत्॥८॥**

**-महर्षिदयानन्दसरस्वती**

[ऋग्वेदभाष्यम्, तृतीयो भागः, ३०पृष्ठे]

# वैदिकवाङ्मये भूगर्भ-विज्ञानम्

डॉ. हरिगोपालशास्त्री
कुलपतिः
गुरुकुलमहाविद्यालयो ज्वालापुरम्, हरिद्वारम्

**'भूगर्भ-विज्ञानम्'** इत्युक्ते, भुवः अन्तर्गतं कीदृशं वर्तते, कीदृशी तस्य रचना, के तत्र पदार्थाः, कीदृशी तेषां तेषां पदार्थानां संगतिः, कीदृक् संक्रमणम्, कीदृक् चङ्क्रमणम्, कश्च एतस्य सर्वस्य प्रभावः इत्यादिकम् उक्तं भवति। आधुनिक्या दृष्ट्या तु भुवः तलानि, तेषां तलानां निर्माणे प्रयुक्ताः धातवः, अन्ये वा पदार्थाः, तेषां पदार्थानां भौतिको रासायनिको वा परिणामः अस्मिन् भूगर्भविज्ञाने पाठ्यते। एतावता स्वर्णः, रौप्यम्, ताम्रम्, लौहम्, पारदः, ओसजन, नाइट्रोजन, क्लोरीन आदयः अनेन विज्ञानेन ज्ञाताः भवन्ति। किञ्च संस्कृत-वाङ्मये भूगर्भविज्ञानं प्राचुर्येण विद्यमानमपि नाधुनिकविज्ञानप्रतिस्पर्द्धितां भजते। अस्य कारणम् अस्माकं देशस्य संस्कृतौ वैदेशिकानां क्रूराक्रमणानि एव सिद्ध्यन्ति। येनास्माकं भूगर्भविज्ञानस्य प्राक्तना सरणिः छिन्ना, अस्य विकासाय नवीनोत्साहश्च त्रोटितः।

इत्थं सत्यामपि नोपलब्धौ क्रमबद्धभूगर्भ-विज्ञानस्य संस्कृत-वाङ्मये, वेदमारभ्य अधुनातन-संस्कृतग्रन्थेषु अस्य विज्ञानस्य प्रस्फुरणं यत्र यत्र दृश्यते। यथा यजुर्वेदे **'ध्रुवासि धारित्री'** इति मन्त्रे भुवः ध्रुवत्वं धातृशक्तित्वं च गीयते। तदेवानुसृत्य सुप्रसिद्धकोशे अमरकोशे–

**'धरा धरित्री धरणी क्षोणि ज्या काश्यपी क्षितिः। सर्वं सहा वसुमती वसुधोर्वी वसुन्धरा। भूतधात्री रत्नगर्भा पृथ्वी तु ह्यचलाचला॥'**

इत्यादि नामकरणेन भुवः गर्भज्ञानोद्घाटनं कृतं वरीवर्ति। एतैः नामकरणैः, विज्ञातृभिरन्वेषकैः भुवः कदाचित् चलत्वं कदाचिदचलत्वं, रत्नगर्भत्वं, स्वर्ण-ताम्राभ्रकरौप्यलौहादिधातुगर्भत्वं च संसाधितम्। तस्यैव फलमिदं यदद्य स्वर्णमारभ्य **'कोयला'**-पर्यन्तं भुवः गर्भाद् निस्सार्यते। सन्त्यद्य बहवो खन्यः धातूनां, भारते अन्यत्र वा विदेशेषु। एतदनन्तरमेव **'मिट्टी का तेल', 'पेट्रोल-डीजल-गैस'** आदि पदार्थानां निष्कासनं प्रारभत। अस्य मूलन्तु संस्कृतवाङ्मये वर्तत एव।

संस्कृतवाङ्मयस्य विशिष्टायां न्याय-वैशेषिकचिन्तनशाखायां पृथ्वी, भूः प्रथम-

द्रव्यतया परिगणितास्ति। तथा हि **'तत्र द्रव्याणि, पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मा-मनांसि नवैव।'** तत्र पृथिव्याः परमाणुरूपत्वमपि संसाधितम्। **'पृथिवी अप् तेज वायुः'** एतेषां परमाणुत्वं नित्यत्वञ्च संसाधितम्। इदमेव मन्तव्यं परीक्ष्य प्रतिशोध्य च ईसातः पञ्चशतवर्षपूर्वं महर्षिणा कणादेन **'परमाणुवाद'** इति क्रान्तिकारि-सिद्धान्तस्य स्थापना कृता। एनमेव सिद्धान्तमनुसृत्य **'एटम बम'** इत्यस्य निर्मातृणा **'आइन्स्टीन'**-महोदयेन यश्चमत्कारः विश्वे प्रदर्शितः सोऽस्ति सर्वविदित एव। अद्यत्वे Motecule सिद्धान्तस्य एष परमाणुवाद एव मूलम्। पृथ्व्यप्तेजोवायु परमाणुसमवायशक्ति-ज्ञानादद्य चमत्कारीणि कार्याणि क्रियन्ते। एतेषां मिश्रणामिश्रणाभ्याम् अनन्ताः दिशः विज्ञानसंसारे प्रकाशतामानीताः।

श्रीमदन्नभट्टेन **'तत्र गन्धवती पृथिवी'** इति सूत्रं निर्माय भुवः परिचायको विशेषो गुणः गन्धः इति निरधायि। तेन उक्तं भवति- **'यत्र यत्र गन्धस्तत्र तत्र पृथिवीति।'** पुनरुक्तं- 'सा पृथिवी अर्थात् 'भू' द्विविधा नित्या अनित्या च। अनित्या कार्यरूपा, नित्या परमाणुरूपा'। पृथिव्याः गन्धवत्वमपि प्राचीन एव सिद्धान्तः। यथा च तत्र अथर्ववेदे कश्चन मन्त्रः **'यस्ते गन्धः पृथिवी सम्बभूव'** तथैव श्रीमद्भगवद्गीतायाम् **'पुण्यो गन्धः पृथिव्यां हि।'**

पृथिव्याः गन्धवत्वस्यापि रहस्यं नातिसामान्यम्। अतः रूप-रस-गन्ध-स्पर्श इति गुणचतुष्टयस्य कृतिप्रकृतिविकृतिभिः किञ्चन पाकजम् उपजायते। तत्र पाको नाम पृथिव्या सह विजानीय तेजसः कश्चन संयोगविशेषः। अयं वस्तुतः भूगर्भस्थोऽग्निरेव अस्ति। अस्याग्नेर्ज्वालाः भूगततेजोधारा-वाहिनीभिर्नाडिकाभिरदभ्यागत्या प्रवहन्त्यः पर्वतशिखराण्यपि विस्फोटयन्त्यो निर्गच्छन्ति, यत् **'ज्वालामुखम्'** इति व्यवह्रियते। एष एतादृशश्च वा पाकः ब्रीहि-गोधूम-तिलादीनां विविधानां औषधानामपि कारणं भवति। अथ च पाषाणादिपरिपाकक्रियायाः मृद्वीकादिफलानामपि परिपाक-क्रियायाः अपि कारणं भवति। एषा एव प्रक्रिया न्यायदर्शने **'पीलुपाक'**, **'पिठरपाक'** इति शब्दाभ्यां बोध्यते।

वस्तुतः यथा मानवादि-जीवानां शरीरेषु रसः रक्तं मांसः इत्यादयः सप्तधातवः वातपित्तप्रभावाद् निर्मीयन्ते तथैव भुवः विभिन्नाः धातवोऽपि भूगर्भीयपाकेन निर्मिताः भवन्ति। तदेवोच्यते- **'यत् पिण्डे तत् ब्रह्माण्डे'**।

अतः संस्कृतवाङ्मये **'भूगर्भविज्ञानम्'** इत्येव नामानुसृत्य कश्चित् ग्रन्थो भवेन्न वा भवेत् किन्तु भूगर्भसम्बद्धज्ञानस्य प्राचुर्यमत्र दृश्यत एव। इत्थं च भूगर्भवैशिष्ट्यसम्पादकानि

अगणितानि कारणानि भवितुमर्हन्ति। तथा हि शास्त्रानुसारेण भूर्भुवः स्वर्महर्जनः तपः सत्यम् उपरि विद्यमानानि इमे सप्त लोका भवन्ति, सप्त भुवनानि वा भवन्ति। तथा अतल-वितल-सुतलादीनि अधोवर्तीन्यपि सप्त भुवनानि यथावदैव व्यवस्थितानि सन्ति।

अस्मिन् क्रमे खलु भुवो नाम प्रथमं दत्तम्। द्वन्द्व-समासे रीतिरियम् उररीक्रियते। तथा हि पाणिनीयसूत्रम्- **'अभ्यहितञ्च'** इति वर्तते। तदनुसारेण द्वन्द्वे श्रेष्ठतमस्य पूर्वप्रयोगो जायते। यथा हि **'तापसपर्वतौ'** इति द्वन्द्वे पर्वतापेक्षया तापसस्य महनीयतया पूर्वप्रयोगो दृश्यते। अतः ज्ञायते यत् चतुर्दश-भुवनेषु सत्स्वपि भुवः तदपेक्षया किञ्चित् महनीयो वैलक्षण्यं विभाति। इदं च वैशिष्ट्यम् अस्य गर्भे ऐहिक-पारलौकिक-सुखसाधाननानि प्रचुररूपेण भवेयुः। ऐहिक-सुखार्थं बहूनि बहुमूल्यानि मणि-मौक्तिक-स्वर्णरत्नादीनि वस्तूनि भुवो गर्भादेव मनुजे लब्धुं शक्यानि। पारलौकिकसुखापेक्षयापि भारतीयसंस्कृति-पाश्चात्यसंस्कृतिषु च तत्तद्धर्म तत्तद्सम्प्रदायावलम्बिजनानुरोधेन तास्ताः समाराधनरीतया उपासनापद्धतया भूगर्भादेव कल्पन्ते, यतोहि भुवि वर्तिभिरेव दार्शनिकैः वैज्ञानिकैश्च महानुभावैराचार्यप्रवरैः इमाः पद्धतयः सृतयश्च आविष्कृता विलसन्तीति।

अंत इदं विचारणीयं यत् भुवि वर्तिभिः कृतानि पौरुषाणि भुवः एव कृतानि भवन्ति। महाभाष्यकारेण पतञ्जलिना तास्थात् ताधर्म्यात् तत्सारूप्यात् इत्यादीनि लक्षणाघटकानि प्रयुक्तानि। यथाहि 'मञ्चा क्रोशन्ति' उपरि दृष्ट्या इदं वाक्यम् असंगतं प्रतीयते। यतो हि भाषणकर्तृत्वावच्छिन्नाभिन्ना मञ्चा इति असंगतमेवास्ति। पतञ्जलिरीत्या वाक्यमिदं नितान्तं समीचीनमस्ति। तेन यथा मञ्चा तत्र पुरुषाणां कश्चन नैकटिकः सम्बन्धोऽस्ति, तथैव भुवोऽपि भुवि वर्तिभिः सहैव नैकटिको सम्बन्धो वर्तते। तेन च भूवर्तिभिः पुरुषे विहितानि विविधानि पौरुषाणि भुव एव कृतानि भवन्ति। पुरुषाणां भुवश्च तादात्म्य-सम्बन्धो उपादान-कारणतया सिद्ध्यन्ति। अनेन समायाति नास्ति कश्चनाऽपि पुरुषार्थसाधकः पदार्थः यश्च भुवो गर्भो न भवेत्। आवश्यकतास्ति एतदर्थं श्रुति-स्मृति - पुराणेतिहासादि - महनीय - शास्त्राणां निरन्तराभ्यासस्य इति।

अस्मिन् विषये बहुलेखनस्य अवसरो विद्यते। मया तु स्थालीपुलाकन्यायेन भूगर्भ-विज्ञानस्य कतिचिदेव विशेषता वर्णिताः सन्ति, सदसदविवेकशालिनो विद्वांसः एवात्र प्रमाणं यद् मया कियत् सफलितम्, इति विस्तराद् विभ्यद् अत्रैव विरमामि।

# ❋ प्रियाया: सान्निध्यम्(२) ❋

डॉ. प्रशस्यमित्र शास्त्री

(साहित्याकादमी-राष्ट्रपति-सम्मानित:)

बी. २९, आनन्दनगरम् (खेलरोड) रायबरेली (उ.प्र.)

श्वेताया: पिता समागत:। 'किमभूत्?' इति प्रश्नं कृत्वा स पुनस्तत्र विराजमानं देवदत्तं निरूप्य किञ्चिदुपेक्षाभावपरिपूर्णो निजगाद– 'त्वम्......?' श्वेताया जननी स्वमुखमण्डले किञ्चित् स्मितिं संश्लेष्य ब्रवीति स्म– 'देवदत्तोऽस्मान् निमन्त्रयितुं समागत:।'

'किमर्थम्?'

'गृह–प्रवेशार्थम्।'

'कुत्र खलु?'

'माडल–टाउन–पार्कस्य समीपे।'

तत्सर्वमाकर्ण्य श्वेताया: पिता देवदत्तं सकौतुकं दृष्टिक्षेपं कुर्वाणो ब्रवीति 'तदेतत् सर्वं त्वया पूर्वं कथं नोक्तम्?' देवदत्तो विहसन्निवाऽब्रवीत्– 'मया तु कथनस्याऽवसर एव न समुपलब्ध:। ममाऽऽगमनसमकालमेव भवान् नानाविधान् प्रश्नान् कर्तुं प्रारब्धवान्। अहं च तेषामुत्तरं कथयामि स्म इति तन्मध्य एव मया स्वकीयमागमनकारणमेव वक्तुं विस्मृतम्। अधुना राजमार्गे गत्वा यदा स्मृति: समागता तदा तत्कथयितुं पुनरहं समागत:।'

श्वेताया जनको विस्मयमिव प्रकटयन्नाह– 'विचित्रो विस्मरणशीलो भवति।'

देवदत्त उवाच– 'वस्तुतो मया विचारितमासीद् यत् पूर्वं श्वेतां कथयित्वा पुन: भवतौ निवेदयिष्यामि परन्तु सर्वं गड्डमड्डायितं खलु। ममैव दोष आसीत् सर्वम्।'

श्वेताया जनक: पूर्ववत् देवदत्तस्य समक्षं समुपविश्य निजपत्नीमब्रवीत्– 'अरे चायं निर्मापयस्व, किमपि मिष्ठान्नादिकं पानीयं चाऽऽनयस्व।'

देवदत्त आह– 'नहि, नहि, नाऽहं मिष्ठान्नादिकं पानीयं भक्ष्यामि।'

श्वेताया: पिता पुनरब्रवीत्– 'एतत्कथं भवितुं शक्नोति। एतावद्दिनाऽनन्तरं त्वं समागतोऽसि, मुखं तु मधुरं विधातव्यमेव।'

'अधुना नहि, पुन: कदाचित्।'

'पुनः कदाचित् कथम्?'

'अद्य काचिदपि बुभुक्षा नाऽस्ति, अतः भोक्तुं न शक्यते।'

'अस्तु तर्हि, चायं तु पास्यसि?'

'नैव, चायमपि नापेक्षते।'

'न हि भो! चायं तु प्राप्तव्यमेव' श्वेताया माता ब्रूते- 'अन्यथा न मह्यं रोचिष्यते।'

देवदत्तस्तदनन्तरं न कामप्यापत्तिं प्राकटयत्। श्वेताया माता चायनिर्माणार्थं प्रस्थिता। श्वेतायाः पिता ब्रूते- 'एष तु मनोरमो वृत्तान्तः।'

देवदत्तो विहस्याऽब्रवीत्- 'अत्रापि किं वैशिष्ट्यं वृत्तम्?'

'तदा तत्र त्वया स भूखण्डः कथं समधिगत? लाटरी-द्वारा कस्यचिन्मन्त्रिणः प्रभावेण वा?'

'कस्यचिन्मन्त्रिमहोदयस्य प्रभावेण नहि, परन्तु एकवर्षपूर्वं लाटरीद्वारैव समधिगतः।'

'तत्र भवनं सम्पूर्णं निर्मितम्?'

'एवं किल।'

'कियद् धनं व्ययीभूतम्।'

'प्रायः पञ्चत्रिंशत् लक्षरूप्यकाणि।'

तत्सर्वं निशम्य श्वेतायाः पितुर्जिज्ञासाऽपरं वृद्धिं गता। स पुनः किञ्चित् कुतूहलेन पृष्टवान्-

'एतावद् धनं त्वया कुतः समधिगतम्?'

'व्यवसाय-द्वारा? कस्य व्यवसायः?'

'अस्माकं सविधे कानिचित् ट्रकयानानि वर्तन्ते।'

'अहो! एवम्?'

'आम्।'

'कुतः खल्विमानि ट्रक-यानानि?'

'बहुदिनादेव इमानि वर्तन्ते।'

'एतैः सर्वैः समं नियोजनवृत्तिमपि साधयसि?'

'साम्प्रतं शीघ्रमेव नियोजनवृत्तिं परित्यक्तुमिच्छामि। अत्राऽत्यन्तं कष्टमनुभूयते। भवांस्तु जानात्येव यद् व्यवसायो व्यापारो वा केवलमन्येषामाश्रयणेन न परिचालयितुं शक्यते। स्वयमेव सर्वं द्रष्टव्यं भवति।'

तस्मिन्नेव काले श्वेताया माता चायं नीत्वा कक्षे समागतवती। तस्या हस्तात् चायस्य चषकपात्रं नीत्वा द्वि-त्रिवारं च मुहुर्मुहुश्चायस्य पानं कुर्वाणो टेबलमञ्चे एव चषकं निहितवान्।

श्वेताया जननी स्वपत्युः समकक्षमेव सोफासने समुपविष्टवती। श्वेतायाः पिता पत्नीमुवाच- 'साम्प्रतं देवदत्तस्तु बहुवित्तयुक्तः सञ्जातः। एतस्य पार्श्वे ट्रकयानानि वर्तन्ते।'

श्वेताया जननी स्वपतिं सम्बोध्य सोत्साहमब्रवीत्- 'त्वमेव पश्य, यदि पुरुषस्य हार्दिकोऽभिलाषः स्यात् तर्हि स किं कर्तुं न हि

शक्नुते? कदाचित्तवाऽप्यायुरिदमेवाऽभूत् परन्तु त्वया किं कृतम्? एकं स्वकीयं भवनमपि न निर्मितम्। 'तदनन्तरं सा देवदत्तं निरूप्य निजगाद- "चाये शर्करा अल्पीयसी तु न वर्तते?'

'न हि, समीचीनैव वर्तते।'

श्वेताया जनकोऽब्रवीत्- 'निमन्त्रणं कस्य दिनस्य वर्तते?'

'अग्रिमे बृहस्पतिवासरे सायंकालस्य।'

'स्वकीय-गृहस्य संकेतो निर्देशश्च याथातथ्यत: प्रदातव्य:।'

'भवान् चिन्तितो मा भवतु, अहं स्वकीयं कारयानं प्रेषयिष्यामि।'

'त्वया कारयानमपि नीतम्?'

'तस्य तु पर्याप्तानि दिनानि व्यतीतानि।'

अत्र कारद्वारा समागतोऽसि?

'न हि, अत्र तु टैक्सीद्वारा समागत: कारयानमन्यस्मिन् कर्मणि कुत्रचित्प्रेषितं वर्तते।'

'आम्, एवं किल।'

तदनन्तरं श्वेताया: पिता आत्मानं निरोद्धुं न समर्थ:। स ससम्भ्रममवादीत्- 'एतावत् वित्तं किं करिष्यसि?'

देवदत्तश्चायस्याऽन्तिमं चूषणं गृह्णन् आह- 'पश्यामि यत् कस्मिन् कार्ये विनियोक्तुं शक्यते। अस्तु साम्प्रतमहं चलिष्यामि।'

'अधुनैव?'

'एवम्, काचित् त्वरा वर्तते?'

'अरे! साम्प्रतमुपविश त्वम्' इत्युक्त्वा स श्वेताम् आकारितवान्। श्वेता तु स्वजनकस्य शब्दोच्चारणसमकालमेव तत्र समागत्य समुपस्थिता सञ्जाता। तदनन्तरं तस्य जनको ब्रवीति- 'तव शिर: पीडायां न्यूनता सञ्जाता?'

'सम्प्रति किञ्चित् स्वस्थतामनुभवामि।'

'शृणु, अग्रिमे बृहस्पतिवासरे सायंकाले कश्चिदपि कार्यक्रमो न निर्धारणीय:। तस्मिन् दिने वयं सर्वे देवदत्तस्य गृहप्रवेशनिमन्त्रणे गमिष्याम:।'

श्वेता विहस्य ब्रवीति- 'देवदत्तस्तु सर्वदैव नितान्त: कर्मठ आसीत्। अस्माभिस्तु विश्वविद्यालयसमयादेव तत्सर्वमनुभूतम्।'

श्वेताया माताऽब्रवीत्- 'एतस्मिन् पर्याप्तं क्षमता: प्रवर्तन्ते।'

श्वेताया जनक आह- 'क्षमतास्तु वर्तन्ते परन्तु एतस्मिन्नल्पायुषि ट्रकयानानां स्वामित्वं स्पृहमीयमेव। तत्सर्वं सौकर्येण न सम्भवति।'

श्वेता देवदत्तं कर्णान्तिकं मन्दस्वरेण पृच्छति- 'किं तत्सर्वं सत्यम्?'

देवदत्त आह- 'यदि त्वं विश्वासं कर्तुं नेच्छसि तदा मा कुरुष्व, परन्तु तेन किम्?'

श्वेताया: पिता तदैव सहसा कक्षाऽन्तरे गन्तुं समुत्थित:। तस्या माताऽपि सोफासनात्

समुत्तिष्ठन्ती प्रोक्तवती- 'युवां वार्त्तालापं कुरुतम्, वयमन्यत् कार्यं पश्यामः।'

देवदत्त आह- 'यदि भवन्तौ किमप्यापत्तिं नाऽनुभवतां तदाऽहं श्वेतां किञ्चित्कालाय नीत्वा गच्छामि।'

श्वेताया जनको ब्रवीति- 'काऽत्राऽऽपत्तिः? नयस्व तावत्।'

तस्य माता किञ्चिद्विरम्याऽब्रवीत्- 'कुत्र गमिष्यथः?'

'चलचित्रं द्रष्टुम्।'

'चलचित्रम्! परन्तु प्रत्यागमनसमये विलम्बो न विधातव्यः। अधिका रात्रिर्न भवेत्।'

'न हि, रात्रिर्न भविष्यति, तदहं प्रतिजानामि।'

श्वेता सहसाऽब्रवीत्- 'परन्तु नाऽहं गन्तुं शक्नोमि। सायंकाले ममैका सखी समागमिष्यति।'

'समागच्छतु नाम' श्वेतायाः पिताऽब्रवीत्- 'देवदत्तोऽपि कथयति, किं तस्य कथनस्य किमपि मूल्यं नास्ति? त्वं देवदत्तेन सममेव भ्रमणार्थं गच्छ।'

तदनन्तरं श्वेतायाः पितरौ पार्श्वस्थे कक्षे प्रविष्टवन्तौ। श्वेता देवदत्तमब्रवीत्- 'तदहं वस्त्र-परिवर्तनं विधाय सद्य एव समागच्छामि।'

'शीघ्रं कर्त्तव्यं, विलम्बो न करणीयः।'

श्वेता वस्त्राणि परिवर्तितुं ततो निर्गता। देवदत्तः किञ्चित्कालपर्यन्तम् एकाकी तत्र समुपविष्ट आसीत्। किञ्चित्कालाऽनन्तरमेव वस्त्रपरिवर्त्तनं कृत्वा शृङ्गारसज्जां च विधाय श्वेता तत्र समागत्याऽब्रवीत्- 'चलतु नाम।'

देवदत्तः श्वेतया समं बहिर्निःसृतः। स आकाशं निपुणं निरूपितवान्। आषाढस्य नवोद्गता कादम्बिनी शनैःशनैः गगनामाच्छादयति स्म। कस्मिन्नपि क्षणे वर्षा प्रारब्धुं शक्नोति स्म। स द्रुतगत्या समक्षमेव धावत् एकं टैक्सीयानमाहूय तस्मिन् श्वेतया समं प्रविष्टवान्। टैक्सीयानचालकं चाऽब्रवीत्- 'चौपाटीक्षेत्रे समुद्रतीरे चल।'

टैक्सीयानं द्रुतगत्या धावति स्म। मेघा वर्षितुमारब्धाः। वर्षाजलमालक्ष्य देवदत्तस्य मानसं लघुतरमभवत्। साम्प्रतं तस्य मानसमन्यथा नाऽभवत्, प्रत्युत मनसो विहारः समाप्तः। तेनाऽनुभूतं यत् अनुकूलः पवनो मन्दं मन्दं नुदति। वर्षन्तं मेघमालक्ष्य स मनस्येवम् अब्रवीत्- 'सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियायाः सान्निध्यं मे भवतु नितराम्।'

अथ च देवदत्त इदमपि विचारयति स्म यत् यदा किल श्वेताया आवश्यकता न भविष्यति तदा प्रत्यागमनकाले स तस्यै सर्वं यथार्थं वक्तुमपि शक्नोति।

**निवेदनम्-** *निवेद्यते यत् स्वविचारान् लेख-कविता-प्रहेलिका-गद्य-पद्यादि-विविध-विधासु प्रकाशनार्थमवश्यमेव लिखित्वा, Unicodefont / kruti ०१० इत्यस्मिन् टंकणं कृत्वा वा स्पष्टरूपेण प्रेषणं msword क्रियताम्। Email- tyagidrvijay@gmail.com*

जनवरी-फरवरी२०१७ इत्यस्मादनुवृत्तम्-

# कुलभूमि-गौरवम्(३)

प्रो. सत्यदेवनिगमालंकार:चतुर्वेदी
प्रोफेसरोऽध्यक्षश्च श्रद्धानन्दवैदिकशोधसंस्थानम्,
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

(३७)

विकसितं चकितं तव लोचनं
सुमधुरास्ति च वाक् सुखदा तता।
सुललिता प्रथिता किल ते तनु-
स्तव तुला नहि काऽपि धरातले॥

(३८)

जगति धर्मगते: परिधारिणी
सुतरणीव भवाब्धिसुतारिणी।
कुटिलता न तता तव जीवने
तव तुला नहि काऽपि धरातले॥

(३९)

अतुलितं ललितं कलकान्तिजं
रुचिरमस्ति सुरूपमथान्तरम्।
कलयसि त्वमहो कलनां परम्
तव तुला नहि काऽपि धरातले॥

(४०)

वयमबोधपरास्त्व बालका
विनिवसाम इहैव तवोदरे।
वितरसीह गुणान् वरदायिनी
तव तुला नहि काऽपि धरातले॥

(४१)

सकलकष्टकलापनिवारिणी
त्वमसि धर्मधुर: परिधारिणी।
विविधशास्त्रविदामुपकारिणी
तव तुला नहि काऽपि धरातले॥

(४२)

त्वयि निवासपरेण मया पुरा
विपुलमाप्तमिदं सुकृतं सुखम्।
स्मृतिपथं प्रवियाति पुन: पुन-
स्तव तुला नहि काऽपि धरातले॥

(४३)

जननि जाड्यमिदं हर मेऽतुलं
बहुविधं बहुजन्मसमर्जितम्।
कुरु कृपामतुलां वरदायिनि
तव तुला नहि काऽपि धरातले॥

(४४)

अयि शिवे शरणागतवत्सले
जगति नाम तव प्रथितं परम्।
चरणयोः पतितं परिरक्ष मां
तव तुला नहि काऽपि धरातले॥

(४५)

यदि भवेन्मम जन्म पुनः पुन-
र्विनिवसेयमहं तव सन्निधौ।
शृणु ममैवमिमां वरकामनां
तव तुला नहि काऽपि धरातले॥

(४६)

यदि भवेत्पशुजन्म ममाखिलं
तदपि ते धरणौ वसतिर्भवेत्।
श्रुतिगिरं नितरां शृणुयामहं
तव तुला नहि काऽपि धरातले॥

(४७)

यदि भवेयमहं खगजन्मनि
तव तरौ निवसेयमहं सदा।
वितर पापहरं निजदर्शनं
तव तुला नहि काऽपि धरातले॥

(४८)

पुनरहो तव चत्वरखेलनं
पुनरहो तव धूलि-विलोठनम्।
पुनरहो शयनं तव हस्तयो-
स्तव तुला नहि काऽपि धरातले॥

(४९)

जननि कस्त्व कीर्तिकलां स्पृशेत्
जननि कस्तव नाम-गणं वदेत्।
त्वमतुला वितता जनमानसे
तव तुला नहि काऽपि धरातले॥

(५०)

विरम वाणि! वदामि हिताय ते
तव कृते सुशकं नहि वर्णनम्।
विजयतां गुरुगौरवसौरभं
विजयतां विमलं कुल-गौरवम्॥

# त्रिपथगा

डॉ. प्रकाशचन्द्रपन्तः 'दीपः'
सहायकाचार्यः, शिक्षाशास्त्रविभागे
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम् ( उत्तराखण्डम् )

(१)

कदाचिद्विष्णोर्या चरणकमलं चुम्बति मुदा ,
कदाचिद् गङ्गेयं विधिकरगतापि प्रमुदिता ।
पृथिव्यां सा देवी पशुपतिजटाभ्यः, प्रकटिता ,
विमुक्त्यर्थं माता सगरतनयानां त्रिपथगा॥

(२)

नगेन्द्रात्सम्भूता मुनिमनुजमान्या प्रतिदिनं
ततः कान्तारं सा प्रविशति सनीरा सुरसरित्।
पुनातीयं लोकं निखिलमथ संयाति जलधिं
द्रुमाणां कूपानां भवति जननीयं त्रिपथगा ॥

(३)

समग्रे देशेऽस्मिन् प्रवहति सलीलञ्च सलिलं
धरित्रीयं पूर्णा खलु तवजलेनैव हरिता।
पिपासामस्माकं शमयति पशूनामपि तथा
कृषिक्षेत्राणां सेचनमपि करोति त्रिपथगा ॥

(४)

इयं दिव्या देवी प्रभवति हिमाद्रेर्भगवती
महार्थं प्रक्षाल्य प्रवहति पवित्राऽवनितले।
यदायं नीरं भुभूतमपि विदीर्य प्रवहति
सदा पेया पूज्याः भवति स्थलभेयं त्रिपथगा ॥

(५)

धरेय धामाभूदयि! तव जलेन त्रिपथगे,
मुदा सेवन्ते ते सलिलमिह ये यान्ति पथिकाः ।
सुधापानं यस्या भवभयविनाशाय कथितं
भवाब्धावस्मिन् या सरलतरणिः का? त्रिपथगा॥

(६)

महापापानां क्षालनमिह करोति प्रतिदिनं
विहारेणापीयं सुखयति जनान् भावभरितान्।
जगन्नाथो मुक्तः कविरपि यशोगाननिरतः
कलौ कीर्त्या केयं? कविकुलकलापा त्रिपथगा ॥

(७)

न जानेऽहं तत्त्वं न च किमपि शास्त्रं श्रुतिमहो
परं जानेऽहं ते जननि भुवि शुद्धोदकमिदम्।
न काचिक्त्यादीहा भुवि तव तटे मे विहरतो
मुखे गाङ्गं नीरं भवतु हृदये मे त्रिपथगा ॥

(८)

क्षिपन्तो दृश्यन्ते त्वयि जननि ये चाप्यवकम्
वराका मूढास्ते किमपि न विजानन्ति मनुजाः ।
नराणां त्वं तेषामघमपि समस्तं कलियुगे
भवानि! प्रक्षाल्य प्रवहसि सदैव त्रिपथगे ॥

(९)
प्रमादाद्यः कश्चिद्यदि किमपि सम्पातयति ना,
त्वदीये गर्भान्तस्तदपि ससुखं पालयसि तम ।
कृपासिन्धूर्मातस्तव सलिलबिभ्रगर्भगवति !
त्रयाणा लोकानां त्वमिह जननी हे त्रिपथगे ॥
(१०)
यदीयं पीयूषं यवननृपतिस्सादरमहो,
सदा पीत्वा मुष्णस्मुऽविदितमिदं भारतभृवि ।
पयो जन्मावृत्तिं हरति मनुजानां धृवमिदं,
जगत्कृक्त्यं पायात् सुरथरिदियं मे त्रिपथगा ॥
(११)
तटे भागीरथ्या भवति यदि वासो मम सदा
तदा मन्येहं यत्सफलमिति जन्माद्य वपुषः ।
असौ धन्यो यस्ते जननि नवगीतानि लिखति
दूतं स्वर्ग याति प्रथितमिदमस्ति त्रिपृथगे ॥
(१२)
स्वयं भस्मीभूतं भवति भुवि पाप यदि कृतं
नराणा नारीगा हतिदिवमहो वारि पिबता
कथेयं ते मात. किल कलियुगे लोकविदिता,
संपूज्या पेया का सरसरसधारा त्रिपथगा ॥
(१३)
त्रयाणां देवानां गृहमपि यया क्षालितमहो
मुनेर्जह्नोर्जाता किल कलिमलक्षालनरना।
सरित्केयं? गंगा प्रवहति सभंगा समतले
नदीनां राज्ञी का? विमलसलिलेयं त्रिपथगा ॥
(१४)
नदीनां सर्वेषां विमलसलिलं दूषितमहो
कथं स्वच्छं स्यात् तज्जलमिह नदीनां कलियुगे।
यदा संकल्पोऽयं भवति मनुजानां हितकर
तदा स्वच्छं स्यात् सम्प्रति न हि जलं जीवनमिदम्॥
(१५)
हिमाद्रिस्ते कीर्तिं भुवनविदितो गायति सदा,
त्वमैवेका गेया कलिमलहरा सम्प्रति भुवि ।
कविर्दीपोऽयं ते लिखति गुणगीति त्रिषथगे,
गृहे नित्यं प्रातर्भवि जननि गास्यन्ति मनुजाः॥

# तैर्विदेशे धनं सञ्चितम्

**प्रो. अभिराज-राजेन्द्रमिश्रः**
कुलपतिचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

निर्मितुं राष्ट्रमिद्धं नु यैः प्रस्थितम्।
केवलं तैर्विदेशे धनं सञ्चितम्॥१॥
ये नियुक्ता जगन्नाथदेवार्चने,
अर्चकैस्तैः स्वयं मन्दिरं वञ्चितम्॥२॥
जम्बुकीसेवयाऽप्तं वने शासनम्,
लुब्धसिंह! त्वया गर्हितं किं कृतम्॥३॥
षण्ढमेकं पुरस्कृत्य भीष्मो हतः,
सव्यसाचिन्! क्व ते युद्धशौर्यं गतम्॥४॥
नाऽवमन्तुं क्षमोऽवन्ध्यकोपोऽपि सन्,
केन तत्तामसं साहसं मे हृतम्॥५॥
यत्सुतावेव दुर्योध्यदुश्सासनौ,
तेन कस्माद् दृगन्धेन राष्ट्रं धृतम्॥६॥
केरलेना[१] ऽवितोऽनन्त - रत्नोच्चयः,
मन्त्रिणा[२] वर्षमात्रेऽखिलं लुण्ठितम्॥७॥
काञ्चनः त्वत्कृते किन्न सोढं मया[३],
बन्धनं भर्त्सनं सर्वजनथूत्कृतम्॥८॥
भेकसम्मर्दमालोक्य मेघागमे,
कोकिलैः कण्ठमाकुञ्च्य सम्यक्कृतम्॥९॥

---

१. पद्मनाभमन्दिराधिकादिभिः।
२. सुरेशकलमादिना।
३. ए.राजोक्तिः

# ❋ चिरकारी ❋

प्रो. रामदत्तशर्मा
प्लाट नं. ७१०२, प्रथमतलम्, पाकेट्-१६, सैक्टर-२४, रोहिणी, नवदेहली-११००८५

स बालको बहुकालात् एकस्यां शिलायामुपरि आसीनश्चिन्तनरत आसीत्। नद्यारुत्तलामनोहराश्च जलतरङ्गा तस्य मन आकृष्टमकुर्वन्। अतएव तस्य चिन्तनविषय-छिन्नोभिन्नश्चाभवत्। कः सः बालक आसीत्? तस्य नाम आसीत् चिरकारी।

चिरकारी एकः सामान्यकुलोत्पन्नो द्वादशस्त्रयोदशवर्षीयः बालक आसीत्। तस्य पिता अत्यन्तक्रोधभरितो दुर्वासा इव आसीत् परन्तु तस्य क्रोधोऽल्पकालीन आसीत्।

एकदा स स्वमित्रैः सह क्रीडासंलग्नः क्रीडारसे एतादृशाः संरतो जातः। स समीपस्थ गृहगतघटनानाञ्चिदपि सङ्केत न जानात्। तस्मिन् काले गृहे तस्य पिता तस्य मातारुपरि आक्रोशनं ताडनञ्च कर्तुं संलिप्त आसीत्। तस्य ध्वनिः क्रीडाक्षेत्रेऽपि आगतः। चिरकारी मित्रेण तस्य ध्यानं तस्य गृहम्यतिकृष्टम् तताश्चिरकारी दृष्टवान् श्रुतवांश्च यत तस्या पितां मात्रे कुपितोऽस्ति। अतः स गृहम्प्रत्यधावेत।

तारस्वरेण पित्रा सपृष्ट कुत्रत्वमगच्छ? चिरकारी सहसा उद्वेलितों जातः। गृहप्रवेशेच्छुकः स पित्रऽवरोधितः। उक्तं च 'श्रृणु पिता पुनरवदत्। अहं बहिर्गमनङ्करोमि। यावत्काल-पर्यन्तम् अहं गृहं प्रत्यागमनं करिष्यामि, तावत् त्वं स्वमातुर्जीवनान्तं कुरु। एषा मदीया आज्ञा।' एवं कथयन् पितृगृहान्निसृतः। चिरकारिणा अस्मिन् विषये किञ्चिदपि न कृतं न चिन्तितम्। पुनश्च इदानीं ममाग्रे द्वौ प्रश्नौ उपस्थितौ स्तः। एकमस्तु मातुर्विनाशकः। अतो बहुकालं यावत् स चिन्तने चिन्तायाञ्च निमग्नोऽभूत्। अतः न किञ्चिदपि कार्यं कर्तुं समर्थो जातः। निर्णायिका बुद्धेरभावात् पूर्ववत् तद्दिनेऽपि एवमेवाऽभूत्। निरन्तररूपेण चिन्तनेनापि तस्य समस्यायाः समाधानो निर्गतः। एवं मुहुर्मुहुश्चिन्तन-करणे अपि च आसनमुद्रास्थितस्य तस्य पार्श्वे निद्रा समागता।

सायंकाले भ्रमणं कृत्वा यदा तस्य पिता गृहम्प्रत्यागनं प्रारब्धवान् तदा चिरकारीं प्रति कथिता वार्ता तस्य स्मृतिपटले उत्तरिता। गृहान्निष्क्रमणम् इदानीं तस्य पितुः क्रोधः शान्तोऽभवत्। स्वधर्मपत्न्या हत्याकल्पनया अत्यन्तदुःखितो भूत्वा, त्वरया धावन् गृहमागच्छत्। अवदच्च अरे चिरकारिन्! चिरकारिन! इति पितुः चीत्कारं श्रुत्वा, तस्य निद्रापलायिता। ततः पिता पुत्रमपृच्छत्, भो त्वया स्वमाता मारिता न वा? अक्षिमर्दनं कुर्वाणः चिरकारी अवदतान् हि पितु! अहन्तु एवं चिन्तनरत आसम्- यथा- यद्यहं मातृवधं कुर्याम महापापभाग भविष्यामि। यदि च पितुराज्ञा तिरस्कृता तदापि तथैव पापपङ्क्त्वो भविष्यामि। अस्मिन्नेव चिन्तनेऽहं निमग्नोऽस्मि।' प्रसन्नचेतसा पित्रा स आलिङ्गितः। पुत्रान् चिरकारिणम्प्रति पिता पुनरकथयत्- 'पुत्र ! अद्य त्वं मां जघन्यापराधात् मुक्तमकरोः। ततः ते सर्वे पारिवारिकजनाः महदानन्दतत्त्वं प्राप्तवन्तः।

अतः भवन्तोऽपि सर्वे एवं चिन्तनं कुर्वन्तु यद् विना समीक्ष्य न किञ्चित् कार्यं प्रारब्धः स्यात्। उक्तञ्च महाकवि भारविना- 'सहसा विदधीत न क्रियाम्।'

उक्तञ्च केनचिद् हिन्दीकविनापि यथा- 'बिना विचारे जो करे सो पाछे पछिताय।'

# ❋ संस्कृतेन विश्वशान्तिः ❋

-कु.पूजारानीशास्त्री
कन्यागुरुकुलमहाविद्यालयः
गुरुकुल-काङ्गड़ी-विश्वविद्यालयः (हरिद्वारम्)

देवानां या भाषा सा संस्कृतभाषा देववाणी गीर्वाण-भारती वाभिधीयते। इयं भाषा वैदिकभाषातः निःसृताऽस्ति। वैदिकभाषा संस्कृतभाषायाः प्राचीनं रूपं विद्यते। विद्यमानेषु निखिलेषु अपि साहित्येषु अस्याः भाषायाः साहित्यं सुविपुलं सर्वश्रेष्ठसुसम्पन्नञ्चास्ति। तत्र ग्रन्थानां संख्या पञ्चाशत्सहस्रादपि अधिका वर्तते। अस्याः भाषायाः साहित्यं द्विविधमस्ति- वैदिकं लौकिकञ्च।

वैदिक-साहित्ये मन्त्रसंहितात्मक-ऋग्वेदयजुर्वेदसामवेदाथर्ववेद-ब्राह्मण-आरण्यक-उपनिषत्-सूत्रग्रन्थ-प्रातिशाख्य-अनुक्रमणिग्रन्थाः समायान्ति। लौकिकसाहित्ये रामायण-महाभारत-पुराण-स्मृति-दर्शन-काव्यग्रन्थादयः परिगणिताः भवन्ति। अत्र आधुनिक-भौतिक-विज्ञानमपि बीजरूपेण विवेचितमस्ति। संसारस्य कस्याऽपि भाषायाः साहित्यं संस्कृतसाहित्यस्य साम्यं नैवाधिगच्छति। अत एव संस्कृतस्य गौरवम् आचार्यवरो दण्डी इत्थं स्पष्टमकरोत्-

**'संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः।'** भाषातत्त्वविदः स्वीकुर्वन्ति यदियं संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। इयमेव भाषा सर्वासाम् आर्यभाषाणां जननी। संस्कृतसाहित्यं नवभिः रसैः विभूषितम्, रीतिगुणालङ्कारादिभिः समलंकृतञ्चास्ति। रसादिध्वनिः अस्यात्मा। यत्र गद्ये पद्ये च लालित्यं भावबोध-सामर्थ्यमद्वितीयमस्ति। चरित्रनिर्माणाय यादृशीं प्रेरणां संस्कृतसाहित्यं प्रददाति, तादृशीं प्रेरणाम् अन्यसाहित्येन नैव। सर्वं जगदिदं सुखशान्तिप्रेमापन्नं सर्वेषां कल्याणायैव भवेत्। मनीषिभिः यथा कथितम्-

**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः॥**

सत्य-संयम-दया-दान-शौच-औदार्य-अनसूया-क्षमा-प्रभृतयः नैकाः मानवीयाः सद्गुणा अस्य साहित्यस्य अध्ययनेन जायन्ते। यैश्च मानवो देवत्वं लभते।

इयं संस्कृतभाषा अस्माभिः मातृसमा वन्दनीया सम्माननीया च, यतो भारतमातुः स्वातन्त्र्यं गौरवमखण्डत्वञ्च संस्कृतेन एव वेदितुं सुरक्षितञ्च कर्तुं शक्यन्ते। यत् इयं वेदवाणी सर्वासु भाषासु प्राचीनतमा श्रेष्ठा तथा च ज्ञान-विज्ञानदृष्ट्या सुसमृद्धा वर्तते। अतएव विद्वद्भिः तत्तद् ग्रन्थाः अस्याः वैज्ञानिकत्वं सेद्धव्यम्,

अन्यासां भाषाणां साहित्ये च तस्या एव अनुकरणं प्रदर्शनीयम्। तदैव आधुनिकः शिक्षितः जनः अनुभविष्यति, निष्चेष्यति च-

**'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।'** संस्कृते सन्धिविधानम् ईदृशः सरलोपाय अस्ति येन वाक्यं पदवल्लघु भवति। तत्र सौन्दर्यं माधुर्यञ्च आयाति। एवमेव समासविधानेन वाक्यं लघु भूत्वा ललितं प्रतिभाति। यथा **'राज्ञः पुरुषः'** इत्यपेक्षया 'राजपुरुषः' इति मनोहरः प्रतीयते। भारतवासिभिः सर्वैरेव राष्ट्ररक्षा हेतोः विश्वसंस्कृतिञ्च अवबोद्धुं दिव्यभावभूता इयं भाषा सदैव अध्येया। अस्याः पठन-पाठनमनिवार्यत्वेन विधेयम्। अद्यत्वे भारतस्य सर्वेषु मानवेषु ऐक्यं परस्परं सौहार्दञ्च दृढयितुं संस्कृतस्य पठनं नितरामावश्यकमस्ति।

विश्वस्मिन् विश्वे न केवलं मनुष्याः अपितु सर्वे प्राणिनः शान्तिं कामयन्ते। कोऽपि दुःखं कष्टं वा नैव वाञ्छति। अनेन स्पष्टं प्रतीयते यद् विश्वशान्तिभावना प्राणिषु स्वाभाविकी वर्तते। सर्वेषु एव धर्मग्रन्थेषु विश्वशान्तिध्वनिः श्रूयते। वेदाः भणन्ति- **दृते दृꣳह मा मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥ (यजुर्वेदः ३६.१८)** अस्यायमभिप्रायः विद्यते यत् सर्वे मनुष्याः सर्वथा सर्वदा सर्वैः सह सौहार्द्येनैव वर्तेरन् इति। सर्वैरीश्वरोक्तोऽयं धर्मः स्वीकार्य्य ईश्वरः प्रार्थनीयश्च यतो धर्मनिष्ठा स्यात्। वेदे निगदितम्-

**'मा गृधः कस्यस्विद्धनम्।'** सर्वेषामीश्वर-प्रार्थनायां विश्वशान्तिकामना प्राप्यते। भारतीयाः प्राचीनकालाद् एव स्ववैदिक-प्रार्थनासु मनुस्मृतेः इदं पद्यं पठन्ति-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥** संस्कृत-भाषायां नास्ति घृणायाः दुर्भावनायाः शत्रुतायाश्च स्थानम्, सा तु सततं शान्तेः एव चर्चा क्रियते।

भारते प्राचीनकालादेव यज्ञाः विश्वकल्याणाय क्रियन्ते। विश्वमूर्तेः परमात्मनः उपासनामेव यज्ञस्य वास्तविकः स्वरूपः विद्यते। अखिलं विश्वं परमेश्वरस्य साकाररूपं मत्वा तस्य मनसा वाचा कर्मणा सेवा एव यज्ञः। स च यज्ञ एव विश्वशान्तेः प्रमुखोपायः।

भारतस्य सर्वे दार्शनिकाः विश्वशान्त्यर्थं प्रयतमानाः दृश्यन्ते। इमे चिरशान्तेः उपायान् अनेकधा वदन्ति। यथा भगवतः बुद्धस्य वाणी विश्वशान्तिभावपूता प्राणिनां शान्त्यर्थमेव प्रवृत्ता सती दृश्यते। तीर्थङ्कराणां जैनमुनीनां सर्वे उद्योगाः एतदर्थमेव सम्भूताः। एवं सत्यपि विश्वशान्तिरवः नैव अनुश्रूयते। विश्वशान्तिवातावरणं नैव दृष्टं भवति। सर्वत्र द्वेषस्य अनलः प्रज्वलितः दृश्यते। मानवः मानवं पीडयति। भ्राता भ्रातरं पद्दलयति। पिता पुत्रं, पुत्रश्च पितरं भक्षयति। पीडनं, कदनं मारणमग्निदाहः स्त्रीबालहत्यादिकं, बलात्कारः श्रूयन्तेऽहर्निशं दृश्यन्ते च समाचारपत्रेषु प्रायशः अवलोक्यन्ते। इत्थमत्र संसारे विग्रहस्य वातारणं प्रबलमास्ते। मानवाः असुरायन्ते, राक्षसायन्ते च। एकः देशः स्वसमृद्ध्यर्थम् अपरं देशं नष्टं विदधाति। सः इमं धर्मं मन्यते। तथा सः मनुष्यविनाशाय घातकानि अस्त्राणि निर्मिमीते प्रयुङ्क्ते च। अणुबम्ब-हाइड्रोजनबम्ब-आविष्कारैः एवंविधैः विश्वस्य वातावरणं संकटग्रस्तमशान्तिमयं वा सञ्जातम् अस्ति। अत एव अन्यानि राष्ट्राणि शान्त्यर्थं तृषित-नेत्रैः भारतं

प्रति अवलोकयन्ति। अतः मनुष्यता-रक्षायै भारतीय-मनुष्यैः गम्भीरतया चिन्तनीयम्।

अद्य धर्मप्राणे भारतेऽपि भौतिकवादस्य एव निनादः वर्ततेतराम्। सः पाश्चात्यसंस्कृति-प्रभावेण आपात-रमणीयेषु भोगेषु रममाणः स्वजीवनसाफल्यमवगच्छति। किन्तु अनेन शान्तिः नैव प्राप्तुं शक्यते। यतः अस्मिन् भोग-प्रधाने भौतिकवादे मानवजीवनस्य एकस्यैव पक्षस्य उन्नतिः भवति। परिपूर्णः विकासस्तु आध्यात्मिकीमुन्नतिं विना न सम्भविष्यति। अतः चिरशान्त्यर्थम् आध्यात्मिकः विकासः कर्त्तव्यः। अनेन समग्रेऽपि विश्वे शान्तिः आगमिष्यति। वेदः कथयति यत्-

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**

अर्थात् भौतिकवादेन शान्तेः अथ च परमसत्यस्य मार्गः अपिहितः वर्तते। परन्तु भौतिकवादोऽपि साधन-रूपेण ग्राह्यः। जीवनाय तस्यापि आवश्यकता अनिवार्या एव। वेदे कथितम्- **'वयं स्याम पतयो रयीणाम्।'** किन्तु जीवनस्य ध्येय-रूपेण आध्यात्मिकाः पन्थाः एव वरणीयाः। इत्थं भारतीया संस्कृतिः मानव-कल्याणाय भौतिकाध्यात्मिकञ्चोभयविधं विकासं वाञ्छति, अपेक्षते च। स्वातन्त्र्यप्राप्तेः पश्चात् भारतेन विश्वशान्ति-दिशायां बहवः प्रयत्नाः विहिताः। भूतपूर्व-प्रधानमन्त्रिणा जवाहरलाल-नेहरुमहोदयेन अनेकवारं संसारः युद्धविभीषिकातः संरक्षितः। भारतस्य वर्तमानशासनमपि घोषयति यत् अस्माभिः अणुशक्तिः मानवोपयोगिषु कार्येषु एव प्रयोज्या, मानव-विनाशाय नैव। विश्वशान्तेः प्रश्नः सम्पूर्णमानवतायाः प्रश्नः अस्ति। अतएव विश्वस्य समस्तैरेव मनुष्यैः अस्मिन् विषये भृशं चिन्तनीयम्, तदनु आचरणीयम्। भारतदेशः विषयेऽस्मिन् विशुद्धां भूमिकां निर्वोढुं शक्नोति चेत्सः भौतिकवादं प्रति आकर्षणं परित्यज्य आध्यात्मिकोन्नतिं स्वजीवनस्य परममुद्देश्यं निर्धारयेत्।

परस्पर-प्रीतिसंवर्धकाः द्वेषभावना-विनाशकाः आदेशा संस्कृत-भाषायां सर्वत्रैव प्राप्यन्ते। यथा-

**मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।**
**सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥**

-**अथर्ववेदः** ३.३०.३

ऋग्वेदः विश्वपुस्तकालयस्य प्राचीनतमः वेदः। तत्र ऋग्वेदे एव (८.४९.२) उक्तं यत् संस्कृत-भाषया एव विश्वेऽस्मिन् जगति शान्तिः भवितुमर्हति। यथा उक्तं च-

**सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानानामुपासते॥**

ईश्वरोऽभिवदति यत् मयोक्तं न्याय्यं पक्षपातरहितं सत्यलक्षणोज्ज्वलं धर्मं यूयं सं गच्छध्वं सम्यक् प्राप्नुत अर्थात् तत्प्राप्त्यर्थं सर्वं विरोधं विहाय परस्परं संगता भवता येन युष्माकमुत्तमं सुखं सर्वदा वर्धेत सर्वदुःखनाशश्च भवेत्। (संवदध्वम्) संगता भूत्वा परस्परं जल्पवितण्डादिविरुद्धवादं विहाय सम्यक् सम्प्रीत्या प्रश्नोत्तरविधानेन संवादं कुरुत, यतो हि युष्मासु सम्यक् सत्यविद्याद्युत्तमगुणाः सदा वर्धेरन्। यूयं जानन्तो विज्ञानवन्तो भवत, जानतां वो युष्माकं मनांसि यथा ज्ञानवन्ति भवेयुस्तथा सम्यक् पुरुषार्थं कुरुत। यथा पूर्वे सं जानाना ये सम्यग् ज्ञानवन्तो देवा आप्ताः पक्षपातरहिताश्चासन्, तथैव युष्माभिरपि स एव धर्म उपासनीयो यतो वेदप्रतिपाद्यो धर्मो निश्शङ्कतया विदितश्च भवेत्। अन्यच्चोक्तम्-

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥**

अस्यायमभिप्रायः वर्तते हे मनुष्या वो युष्माकं

यत्सर्वं सामर्थ्यमस्ति … द्धं
कृत्वा सर्वैः सुखं स … श्च
यजुर्वेदे- द्यौः शां … थवी
शान्तिरापः शान्तिरो … तयः
शान्तिर्विश्वे देवाः शा … न्तिः
शान्तिरेव शान्तिः स … हे
सर्वशक्तिमान् परमेश्वर! … ।
द्यौरन्तरिक्षं पृथिवी जलमोषधयो वनस्पतयो विश्वे देवाः सर्वे विद्वांसो ब्रह्म वेदः, सर्वं जगच्चास्मदर्थं शान्तं निरुपद्रवं सुखकारकं सर्वदाऽस्तु। अनुकूलं भवतु नः। येन वयं सर्वस्मिन् विश्वे कल्याणस्य भावनया कार्यं कुर्मः। न तत्र भवेत् कापि स्वकीय-स्वार्थ-भावना। समस्तविश्वमेव तु अस्माकं कुटुम्बमेव वर्तते। संस्कृतभाषा एव तु सा भाषा वर्तते, यया विश्वेऽस्मिन् शान्तिं भवितुं शक्नोतीति। अन्यच्च कापि भाषायां नास्ति एवंविधा भावना, या समस्त-प्राणिषु एकसूत्रेषु बध्नाति। अन्ते कथयामि संस्कृतभाषया एव विश्वेऽस्मिन् शान्तिः भविष्यति। अत्र नास्ति किमपि विप्रतिपत्तिः। ●

# भारतोदय-प्रकाशन-विवरणम्


**भारतोदयस्य स्वामित्वानुबन्धि फरवरी-मासात् परं निर्देष्टव्यं विवरणम्**

**फार्म-६, नियम-८**

| | | | |
|---|---|---|---|
| १. | प्रकाशन-स्थलम् | - | गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| २. | प्रकाशन-समयः | - | मासिकम् |
| ३. | मुद्रकस्य नाम | - | डॉ. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | मुद्रणालय-सङ्केतः | - | न्यू जे.एन. स्टेशनरी मार्ट, गुरुद्वारा रोड, ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ४. | सम्पादकस्य नाम | - | डॉ. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | सङ्केतः | - | कुलपतिः, गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ५. | प्रकाशकस्य नाम | - | डॉ. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | सङ्केतः | - | कुलपतिः, गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) पत्रालयः- गुरुकुलकाङ्गड़ी-२४९४०४, हरिद्वारम् (उत्तराखण्डः) |

अहं डॉ. हरिगोपालशास्त्री अनेन घोषयामि, यदुपरि लिखितं सर्वं विवरणं ममाभिज्ञानानुसारं यथावद् वर्तते।

-डॉ. हरिगोपालशास्त्री
प्रकाशकः सम्पादकश्च
भारतोदयः (संस्कृत-मासिकस्य)

दिनाङ्कः- १.३.२०१७ ई.

# मधुमास:

डॉ. रणजीतकुमारी झा
सेवासदनम्, बोकारो (झारखण्डम्)

(१)

रे चण्ड कोकिल! कुहू कुहू मा कुरु ।
ज्वलयति मे चित्तं प्रियाविियुक्तम् ॥

(२)

प्रचण्डसन्ताप - संयन्त्र - तापितोऽहम्,
अनङ्गबाणेन प्रपीडितोऽहम् ।
कान्ताावियुक्तं रसेन रहितम्,
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

(३)

कपोलकोमल - पल्लवमञ्जरीषु,
अधरायितोऽयं मधुगुञ्जायितोऽयम् ।
सुमनेषु सुमनो हि मधुप रसेन युक्तम्,
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

(४)

विरहशीतं व्यतीतं नववसनविभूषितेयम्,
रसाल - मिलिता - नवमाल्लिकेयम् ।
परिचुम्ब्यालिङ्गतो मिथ: रागेन युक्तम्,
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

(५)

पुष्प - पराग - परिव्याप्तपुष्करोऽयम्,
खगकुलकेलिक्रीडासुशोभित-सरससलिलोऽयम् ।
मदयति मे हृदयं नेत्रेण युक्तम्,
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य
भारतोदय: (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्, श्री...

(६)

नानाविधप्रसूनपरागसंगृह्य नैकनदीनीरशीतायितोऽयम्,
मन्दं मन्दं गुञ्जन् सङ्गीतं प्रमत्तकुर्वन् मलयानिलोऽयम् ।
विवाति बाणेन अलसेन युक्तम् ।
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

(७)

मधुमास मधु इव सुजनेषु स्वान्तेषु,
मदेन मत्त: मदनेन दत्त: ।
दर्शयति स्वप्रभावं देहेन युक्तम्,
ज्वलयति मे चित्तं प्रियावियुक्तम् ॥

*मुद्रकेण,प्रकाशकेन* **डॉ. हरिगोपालशास्त्रिणा** *ज्वालापुर-स्थिते* **'न्यू जे.एन. स्टेशनरी मार्ट'** *नामके मुद्रणालये मुद्रापयित्वा* **'भारतोदय:'** *मासिकपत्रं प्राकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।*
**सम्पादक: डॉ. हरिगोपालशास्त्री**